# Shrirama Kavacham

# श्रीरामकवचम्

## Document Information

Text title : Rama Kavacham 3

File name : rAmakavacham3.itx

Category : raama, vAdirAja, kavacha

Location : doc_raama

Author : vAdirAjayati

Proofread by : Gayathri Veda, Revathy R.

Latest update : June 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 8, 2024

*sanskritdocuments.org*

# श्रीरामकवचम्

कपिकटकधुरीणः कार्मुकन्यस्तबाणः
क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।
जलधिरचितसेतुर्जानकीतोषहेतुः
पथि पथि गुणसान्द्रः पातु मां रामचन्द्रः ॥ १॥

श्रीमत्किरीटविभ्राजिशिरा रामः शिरोऽवतु ।
कुटिलालकसंशोभिललाटान्तः सुरार्थितः ॥ २॥

माणिक्यमौक्तिकोद्भासितिलकः सूर्यवंशजः ।
ललाटं पातु सुभ्रूर्मे कौसल्यानन्दनो भ्रूवौ ॥ ३॥

धनुर्विद्यापारदृश्वा नेत्रे पात्वब्जलोचनः ।
लसन्नासापुटो नासां विश्वामित्रवृतोऽवतु ॥ ४॥

बिम्बोष्ठोऽव्यान्मदीयौष्ठौ शम्भुकार्मुकभञ्जनः ।
कुन्दकोशलसद्दन्तो दन्तान्मे जानकीपतिः ॥ ५॥

मनोज्ञरसनो जिह्वां पातु लोकमयान्तकृत् ।
वाचं व्याख्याविदग्धोऽव्याच्यक्तसाम्राज्यसम्भ्रमः ॥ ६॥

आस्यं चन्द्रोपमास्योऽव्याद्रामचन्द्रो वनेचरः ।
कम्बुग्रीवोऽवतु ग्रीवां खरदूषणसैन्यजित् ॥ ७॥

चारुदीर्घकरः पाणी मारीचमृगलुब्धकः ।
कङ्कणाङ्गदमुद्राढयोऽङ्गुलीस्त्यक्तप्रियाकृतिः ॥ ८॥

पातु पीनांसयुग्मोऽसौ हनूमन्नयनोत्सवः ।
हारकौस्तुभभृत्कण्ठमूलं सुग्रीवसख्यकृत् ॥ ९॥

उरः पातु महोरस्कः तालात्मासुरखण्डनः ।
मध्यं कृशलसन्मध्यः पातु वाल्यङ्गभेदनः ॥ १०॥

दर्भशायी विभुः पातु वलीस्त्रिवलिपल्लवः ।
तनुदरः पातु कुक्षिं कृतसेतुर्महार्णवे ॥ ११॥

निम्ननाभिः प्रभुः पातु नाभिं कपिचमूपतिः ।
पीताम्बरः स्फुरत्काञ्चीद्योतमानकटिद्वयः ॥ १२॥

ङ्कप्राकारनिर्भेदी रामः पात कटिं मम ।
ऊरू करिकरोरुर्मे चारुबाणधनुर्धरः ॥ १३॥

जृम्भिरावणसैन्याब्धिकुम्भसम्भवकोटिधूः ।
जानुनी वृत्तविलसज्जानुयुग्मो ममावतु ॥ १४॥

कम्भकर्णादिनिर्भङ्गदम्भोळासमसायकः ।
जङ्घे तुङ्गेभदन्ताभजङ्घायुग्मोऽवतु प्रभुः ॥ १५॥

दशाननशिरोरण्यपरश्वधपराक्रमः ।
मुक्ताङ्कुरसमश्रीमद्गुल्फों गुल्फौ ममावतु ॥ १६॥

ससम्भ्रमसुरश्रेणीशिरोजुष्टाङ्घ्रिपल्लवः ।
पादौ रक्षतु मे नित्यं विभीषणपदप्रदः ॥ १७॥

नखान् पातु नखश्रेणीशशिद्योतितदिङ्मुखः ।
अग्निज्वालोदितस्वीयसीतो वीतच्छिदाकृतिः ॥ १८॥

रक्तपादतलादित्यः पातु पादतले मम ।
प्राप्तायोध्यापुरैश्वर्यः प्राच्यां पातु मनोरमः ॥ १९॥

धर्मप्रवर्तकः पायादवाच्यां नीरदद्युतिः ।
पातु प्रतीच्यां यज्वीन्द्रो हनूमत्पारमेष्ठयदः ॥ २०॥

उदीच्यामुद्गतायोगविदेहतनयाप्रियः ।
अधोऽधःकृतपापौघः पातु रामोऽखिलाग्रणीः ॥ २१॥

ऊर्ध्वमुन्नीतसञ्जीवनानासङ्घसुखप्रदः ।
य इदं रघुनाथस्य कवचं बिभृयान्नरः ॥ २२॥

यतिना वादिराजेन रचितं निर्मलं दृढम् ।
स्प्रष्टुं तं नैव रक्षांसि पापानि रिपवोऽपि वा ॥ २३॥

विपदो व्याधयो वाऽपि शक्नुवन्ति शरोपमाः ।
अरिं जित्वा तु संसारं यास्यत्यन्तेऽपुनर्भवम् ॥ २४॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं
श्रीरामकवचं सम्पूर्णम् ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Gayathri Veda

---

*Shrirama Kavacham*

pdf was typeset on June 8, 2024

Please send corrections to *sanskrit@cheerful.com*